International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 17-21
© 2023 IJSR
www.anantaajournal.com
Received: 09-02-2023
Accepted: 13-03-2023

**श्रीविद्या जी**
सहायकाचार्या, संस्कृतं जनरल्
विभागः, श्रीशङ्कराचर्य
विश्वविद्यालयः, कालटी, केरल, भारत

**Corresponding Author:**
**श्रीविद्या जी**
सहायकाचार्या, संस्कृतं जनरल्
विभागः, श्रीशङ्कराचर्य
विश्वविद्यालयः, कालटी, केरल, भारत

# भाषाविज्ञानक्षेत्रे पाणिनीयशिक्षा

## श्रीविद्या जी

**सरांशः**
भाषाविज्ञानक्षेत्रे वर्णानां संख्यायाः तथा उच्चारणप्रक्रियायाः च ज्ञानमवश्यमेव । अद्यतनीयाः भाषावैज्ञानिकाः अपि उच्चारणविद्यान्तर्गते शिक्षाविषयस्याध्ययनं कुर्वन्ति । शिक्षाणां पूर्वरूपाणि भवन्ति प्रातिशाख्यानि । वर्णानामनुशीलनञ्च प्राचीनभारतीयानाम् उच्चारणसम्बन्धिवैज्ञानिक-गवेषणस्य द्योतकम् । साधुशब्दप्रयोगस्य महत्वं शिक्षाशास्त्रस्य प्रयोजनं च प्रतिपादिदम् अस्मिन् शास्त्रे ।

**कूटशब्दः** वर्णोच्चारणप्रक्रिया, वर्णानां पञ्चधात्वम्, वर्णानां संख्या, शिक्षासाहित्यम्, शिक्षेतिहासः

**प्रस्तावना**
अज्ञाननिवारणार्थं वेदाध्ययनं, तत्तु शिक्षाध्ययनेनैव साध्यम्। सायणस्य ऋग्वेदभाष्यभूमिकायामुक्तम् - 'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति' । 'शिक्षा'शब्दस्य अर्थो भवति वैदिकमन्त्राणामुच्चारणविधिः । वर्णानामुच्चारणस्थानप्रयत्नक्रमादिबोधकं शास्त्रं भवति शिक्षाशास्त्रम्। शुद्धोच्चारणविधेः ज्ञानं शिक्षाशास्त्रस्य प्रयोजनम्। वर्णः, स्वरः, मात्रा, बलम्, सामः, सन्तानः, इत्यादयः शिक्षाध्यायः [1]।

> यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
> सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः [2]॥

शिक्षासङ्ग्रहनामके ग्रन्थे द्वात्रिंशच्छिक्षापुस्तकानां सङ्ग्रहोऽवाप्यते ।श्रीबलदेव-उपाध्यायः स्वकीये 'वैदिक साहित्य और संस्कृति' इत्येतदभिधेये ग्रन्थे याज्ञवल्क्यशिक्षा-वासिष्ठीशिक्षादिसंज्ञकानां विंशतिग्रन्थानामुल्लेखं विदधानो दृश्यते । शिक्षाशास्त्रविषयकाः प्राचीनतराः ग्रन्थाः न उपलभ्यन्ते। श्रीवाचस्पतिगैरोला स्वकीये इतिहासे लिखति यत्, सत्यकेतुविद्यालङ्कारस्य मतमिदं यत् 'जैगीषव्यस्य शिष्यो बाभ्रव्यः शिक्षाशास्त्रं प्रणिनाय। महाभारते शान्तिपर्वणि आचार्यगालवकृतस्य शिक्षाग्रन्थस्योल्लेखो लभ्यते ।

भारद्वाजशिक्षायाः प्रकाशनं जातमस्ति भण्डारकरशोधसंस्थानतः । साम्प्रतं समवाप्ता पाणिनीयशिक्षा प्राचीनशिक्षासूत्राणां साहाय्येन प्रणीता अभूदिति बुधानां विचारः । इदानीं शुक्लयजुर्वेदे याज्ञवल्क्यशिक्षा, सामवेदे नारदशिक्षा, अथर्ववेदे माण्डूकीशिक्षा, किञ्च ऋग्वेदे पाणिनीयशिक्षा च प्राप्यन्ते न च अन्या काऽपि।ब्राह्मणग्रन्थेषु उपनिषत्ग्रन्थेषु च शिक्षासम्बद्धनियमानां शिक्षासिद्धान्तानं च उल्लेखो प्राप्यते। ॐ इत्यस्य शब्दस्य व्याख्यानं द्रष्टुं शक्यते।तैत्तिरीयोपनिषदः प्रथमवल्ल्यामस्याः शिक्षायाः समस्तमूलसिद्धान्तस्य विवेचनमुपलब्धं भवति । यथा-शिक्षां व्याख्यास्यामः ॥ वर्णः, मात्रा, बलं, साम, सन्तानः, इत्युक्तः शिक्षाध्याये'॥ वर्णस्य अभिप्रायः अक्षराणि भवन्ति । स्वरस्याभिप्रायः उदात्तानुदात्तस्वरितैः सहास्ति । मात्राशब्देन उच्चारणसापेक्षसमय एवास्ति । मात्रा त्रिधा भवति - ह्रस्व-दीर्घ-प्लुताश्चेति । बलेन स्थानप्रयत्नयोः बाधो भवति । सामशब्दस्यार्थो भवति-'साम्यम्' अर्थात् दोषरहितम् अनुदात्त-माधुर्यादिगुणयुक्त-मुच्चारणम् । सन्तानः - सन्तानशब्दस्यार्थो भवति पदानामतिशयसनिधिः ।प्रधानशिक्षायाः संक्षिप्तपरिचयम् एवं प्रकारेण कर्तुं शक्यते।व्यासशिक्षा, भरद्वाजशिक्षा, पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, वासिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, माण्डव्यशिक्षा, अमोघानन्दिनीशिक्षा, माध्यन्दिनीशिक्षा, वर्णरत्नप्रदीपिकाशिक्षा, केशवीशिक्षा, मल्लशर्मशिक्षा, स्वराङ्कशशिक्षा, षोडशश्लोकीशिक्षा, अवसाननिर्णयशिक्षा, स्वरभक्तिलक्षणशिक्षा, प्रातिशाख्यप्रदीप-शिक्षा, नारदीयशिक्षा, गौतमीशिक्षा, लोमेंशीशिक्षा, माण्डूकीशिक्षा, कामसन्धानशिक्षा, गलब्रुशिक्षा, मनःस्वार-शिक्षा आपिशलि-पाणिनि-चन्द्रगोमीत्यादीनि शिक्षासूत्राणि च सन्ति ।च ।एतदतिरिक्तान्यपि शिक्षाशास्त्राणि सन्ति, येषां प्रकाशनमद्यावधिः नाभवत् । एते ग्रन्थाः हस्तलिखितरूपेण एव अवतिष्ठन्ते । एतेषु शिक्षाग्रन्थेषु प्राचीनशिक्षासूत्रमपि विद्यमानमासीत् । यथा अष्टाध्यायीम् आधारीकृत्य चन्द्रगोमीपण्डितेन स्वं व्याकरणं विरचितं स्यात्तथैव पाणिनिशिक्षासूत्राणि आधारीकृत्यैव स्वकीयवर्णसूत्राणां रचना कृताऽस्ति ।

**पाणिनीयशिक्षानुसारेण वर्णसंख्याविज्ञानम् वर्णोच्चारणप्रक्रिया च ।**

शिक्षेयं प्रसिद्धा लोकप्रिया चास्ति । लौकिकानां वैदिकानाञ्च शास्त्राणां कृते शिक्षेयं नितान्तमुपयोगित्वेन अधिकमहत्त्वपूर्णाऽस्ति । ग्रन्थेऽस्मिन् षष्टिः श्लोकाः सन्ति । एतेषु श्लोकेषु उच्चारणविधिसम्बद्धविषयाणां संक्षिप्तं किञ्चोपादेयं विवरणं प्रदत्तमस्ति । ग्रन्थान्ते पाणिनेरुल्लेखः दाक्षीपुत्रनाम्ना कृतोऽस्ति ।

**वर्णानां संख्या**

त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा [3]॥

अक्षरसमाम्नायः, वर्णसमाम्नायः, वर्णमाला वा पर्यायवचिनः शब्दाः। वर्णाः के? तेषां प्रकारः कीदृशः इति पश्यामः।

स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः [4]॥

'स्वृ' शब्दोपतापयोरिति धातोः करणेऽच् प्रत्यये कृते सति स्वरशब्दो निष्पद्यते। स्वयं राजते इति स्वराः, स्वर्यते व्यञ्जनं स स्वरः, शब्द्यतेऽनेन इति स्वरः। अ, इ, उ, ऋ एते वर्णाः ह्रस्वदीर्घप्लुत भेदेन द्वादशसंख्यका भवन्ति।ए, ओ, ऐ, औ एतानि सन्ध्यक्षराणि दीर्घप्लुत भेदाभ्याम् अष्टप्रकारकाणि सन्ति।लृकारः ह्रस्वप्रकारक एक एव । (12+8+1=21 इति स्वराणां संख्या एकविंशतिः।) स्पर्शानां संख्या पञ्चविंशतिः , कादयो मावसानाः स्पर्शाः अर्थात् ककारादारभ्य मकारपर्यन्तं पञ्चवर्गेषु विभक्ताः वर्णाः पञ्चविंशतिः। प्रतिवर्गाः पञ्चवर्णाः भवन्ति । (5x 5 = 25) यादयः इति य, व, र, ल, श, ष, स, ह अष्टसंख्यकाः सन्ति।यमाः चत्वारः। वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्ध इति सिद्धान्तकौमुद्याम्।पलिक्क्ँनीः, चख्ख्ँनतुः, जग्ग्ँमतुः, जघ्घ्ँनतुः इति यथासंख्यं ककारूपः.खकाररूपः,गकाररूपः, घकाररूपः च यमाः।इथं प्रकारेण सभेदं स्वराणां, स्पर्शानां,यादीनां, यमानां च परिसंकलनेन (21+25+8+4=58) अष्टपञ्चाशत् संख्या भवति।अनुस्वारः,

विसर्गः, जिह्वामूलीयोपसर्गौ, प्लुत लृकारः, इति पुनः पञ्चसंख्यकाः च । एवं प्रकारेण त्रिषष्टिः वर्णाः। एकः दुःस्पृष्टवर्णः (ळ)अप्यस्ति। यति तदपि गणयति चेत् चतुषषष्टिः वर्णाः भवन्ति। परेण स्वरेण व्यज्यते इति व्यञ्जनम् [5]|

यः स्वयं राजते तं तु स्वरमाह पतञ्जलिः।
उपरिस्थायिना येन व्यङ्ग्यं व्यञ्जनमुच्यते [6]॥

व्यञ्जयन्ति प्रकटीकुर्वन्ति अर्थानि इति व्यञ्जनम् [7]। अनुस्वारः - स्वरम् अनु (पश्चात्) भवति इति अनुस्वारः।

अनुस्वारो विसर्गश्च स्वरात्परौ तु तिष्टतः।
अनुस्वारः शिरोबिन्दुः पार्श्वे बिन्दू विसर्गकः[8]

कखाभ्यां प्रागर्धविसर्गसदृशध्वनिर्जिह्वामूलीयः। पफाभ्यां प्रागर्धविसर्गसदृशध्वनिरुपध्मानीयः। प्लुतलृकारः (लृ३), दुःस्पृष्टः (ळ - यथा अग्निमीळे) च ।

| स्वराः (21) | | | | | |
|---|---|---|---|---|---|
| ह्रस्वः | | दीर्घः | | प्लुतः | |
| अ | | आ | | अ३ | |
| इ | | ई | | इ३ | |
| उ | | ऊ | | उ३ | |
| ऋ | | ॠ | | ऋ३ | |
| लृ | | | | | |
| | | ए | | ए३ | |
| | | ऐ | | ऐ३ | |
| | | ओ | | ओ३ | |
| | | औ | | औ३ | |
| व्यञ्जनानि (25) | | | | | |
| कवर्गः | क | ख | ग | घ | ङ |
| चवर्गः | च | छ | ज | झ | ञ |
| टवर्गः | ट | ठ | ड | ढ | ण |
| तवर्गः | त | थ | द | ध | न |
| पवर्गः | प | फ | ब | भ | म |
| अन्तस्थाः(4) | | य | र | ल | व |
| ऊष्माः(4) | | श | ष | स | ह |
| यमाः (4) | | कुँ | खुँ | गुँ | घुँ |
| अनुस्वारः (1) | | (ं) | | | |
| विसर्गः (1) | | (ः) | | | |
| जिह्वामोलीयः (1) | | | | | |
| उपध्मानीयः (1) | | | | | |
| प्लुतलृकारः(1) | | लृ३ | | | |
| दुःस्पृष्टः(1) | | ळ | | | |

21+25+4+4+4+4+1+1=64

कतिपयमते लृ३ कतिपयमते ळ वा भवति ।

अतः त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः इति कथ्यन्ते।

**वर्णानां पञ्चधात्वम्**

येषां वर्णाणां स्वरतः, कालतः, स्थानतः, -बाह्याभ्यन्तरप्रयत्नतः च पञ्चधात्वम् ।

**स्वरभेदः**

अत्र ह्रस्वदीर्घप्लुत भेदेन पुनः उदात्तानुदात्तस्वरित भेदेन तथा अनुनासिकाननुनासिका भेदेन च स्वराणां भेदाः।

**कालभेदः**

ह्रस्वस्य एकमात्रः, दीर्घस्य द्विमात्रः, प्लुतस्य त्रिमात्रः,व्यञ्जनवर्णस्य अर्धमात्रः इति वर्णानां कालभेदाः।

**स्थानानि**

उरः, कण्ठः, शिरः, जिह्वामूलः, दन्ताः, नासिका, ओष्टौ, तालु इति वर्णस्थानानि अष्टौ।

वर्णानामुच्चारणार्थं सास्त्रेषु अष्टौ स्थानानि निर्दिष्टानि।उरः, कण्ठः, शिरः, तालु, जिह्वामूलम्, नासिका, ओष्टौ, दन्ताः च एते स्थानानि।आपिशलि शिक्षासूत्रे (7.3.4) यत्र स्थाने वर्णा उपलभ्यन्ते तत् स्थानम्।

हकारस्य सयुक्तावस्थायां स्थानम् उरः, असंयुक्तावस्थायां तु कण्ठः।अकारस्यापि स्थानः कण्ठः, इकारस्य, चवर्गस्य, यकारस्य, शकारस्य च स्थानं भवति तालु, उकारस्य, पवर्गस्य च ओष्टौ, ऋकारस्य, टवर्गस्य, रेफस्य, षकारस्य च मूर्धा, लृकारस्य, तवर्गस्यम् लकारस्य, सकारस्य च दन्ताः, कवर्गस्य जिह्वामूलम्, अनुस्वारस्य, यमानां च स्थानं नासिका भवति।अयोगवाहाः (विसर्गः, जिह्वामूलीयः, उपध्मानीयः) आश्रयस्थानभागिनः इति पाणिनीयशिक्षायाम्।

**प्रयत्नौ**

अचोऽस्पष्टाः यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः।
शेषाः स्पृष्टाः हलः प्रोक्ता निबोधानुप्रदानतः [9]॥

**आभ्यन्तरप्रयत्नस्तु चतुर्धा –**

अस्पृष्टाः, ईषत्स्पृष्टाः, अर्द्धस्पृष्टाः स्पृष्टाः, इति ।

**स्वराः** अस्पृष्टवर्णाः अर्थात् विवृताः,

अन्तःस्थाः (य्, व्, र्, ल्) ईषत्स्पृष्टवर्णाः तथा ईषद्विवृताश्च,

**ऊष्माणः** (श्, ष्, स्, ह्) अर्द्धस्पृष्टाः,

**स्पर्शाः** (वर्गाक्षराणि) स्पृष्टवर्णाः इति आभ्यन्तरप्रयत्नप्रकाराः ।

ञमोऽनुनासिका नह्नौ नादिनो हझषः स्मृताः।
ईषन्नादा यणो जश्च, श्वासिनस्तु खफादयः॥
ईषच्छ्वासांश्चरो विद्याद् गोर्धामैतत्प्रचक्षते ।
दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि [10]॥

**बाह्यप्रयत्नस्तु पञ्चधा -**

अनुनासिकसंज्ञकाः ञम्, अननुनासिकसंज्ञकौ हकाररकारौ, ईषन्नादाः यण्, तथा वर्गाणां तृतीयवर्णाश्च, श्वासप्रयत्नाः खफादयश्च, ईषत्-श्वासप्रयत्नसंज्ञकाः चरः ।एवं प्रकारेण प्रयत्नौ द्विविधौ आभन्तरः बाह्यश्च । बाह्याभ्यन्तरप्रयत्नसहकारेणैव वार्णानां साधूच्चारणं सम्भवति ।

**वर्णोच्चारणप्रक्रिया**

उक्तानां वर्णानां कर्ता तु आत्मा एव।स आत्मा पदार्थान् बुद्धिविषयीकृत्या विवक्षया प्रेरयति मनः, मनः जठराग्निं आहन्ति । स अग्निः प्राणं प्रेरयति।कायाग्निप्रेरितः वायुः हृद्देशे चरन् स्वरं जनयति ।

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्ष्या।
मनः कायाग्निमाहन्ति, स प्रेरयति मारुतम् [11]॥

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणाः ये मनीषिणः। गुहा त्रीणि निहिता नेङ्ग्यन्ति तुरीयं वाचो मनुष्या वदन्ति [12]॥

शुद्धपाठकानां गुणाः उच्चारणदोषाश्च श्लोकद्वयेन स्पष्टो भवन्ति ।

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठकगुणाः [13]॥

शुद्धोच्चारणसमर्थानां मधुरता, सुस्पष्टता, यथोचितपदविभक्तता, सुस्वरता, धीरता, लयात्मकता एते षड्गुणाः भवन्ति ।

शङ्कितं भीतिमुद्घृष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसिगं तथा स्थानविवर्जितम् [14]॥

सन्देहसम्पृक्तम्, भयसहितम्, प्रकृष्टध्वनिसंयुक्तम्, निरनुनासिकमपि नासिकासहितम्, काकस्वरम्, मूर्धपीडकम्, स्थानरहितम् च वर्णाः न वक्तव्यम् ।
सदृष्टान्तं वर्णोच्चारणविधिं कथयति-

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् [15] ॥

**उपसंहारः**

एकः शब्दः सम्यग्ज्ञातः सुष्टु प्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग् भवति इति साधुशब्दप्रयोगस्य महत्वम्। शब्दोच्चारणं वर्णैरेव भवति । महाभाष्यस्य प्रत्याहाराह्निके -

वर्णज्ञानं वाग्विषयो, यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं, लघ्वर्थं चोपदिश्यते ॥

अतः वर्णानां संख्यायाः तथा उच्चारणप्रक्रियायाः च अध्ययनमवश्यमेव । शिक्षाणां पूर्वरूपाणि भवन्ति प्रातिशाख्यानि । पदप्रकृतानिप्रातिशाख्यानि, एतदतिरिक्तं प्रातिशाख्यग्रन्थेषु, शिक्षा-व्याकरण-छन्दसां नियमाः विवेचिताः सन्ति । इमे प्रातिशाख्याः संहिताभेदेन शाखाभेदेन वा विभिन्नाः वर्तन्ते । यथा ऋग्वेदस्य ऋक्प्रातिशाख्यम्, यजुर्वेदस्य वाजसनेयिप्रातिशाख्यम्, तैत्तिरीयप्रातिशाख्यम्, सामवेदस्य ऋक्तन्त्रम्, पुष्यसूत्रप्रातिशाख्यं तथा अथर्ववेदस्य शौनकीयाप्रातिशाख्यम्, अथर्ववेदप्रातिशाख्यञ्च सुप्रसिद्धाः प्रातिशाख्यग्रन्थाः सन्ति ।शिक्षा-प्रातिशाख्ययोः परस्परसम्बन्धविषये मतैक्यं नास्ति । अस्य वेदाङ्गसंज्ञया न व्यवह्नियन्ते । प्राचीना ऋषयः भाषाशास्त्रस्य वैज्ञानिकाध्ययनमकुर्वन्। विषयस्य अस्य एवंविधं वर्णानमनुशीलनं प्राचीनभारतीयानाम् उच्चारणसम्बन्धिवैज्ञानिकगवेषणस्य द्योतकम् अस्ति।अद्यापि तत्तद्वैदिकमन्त्राणां तथैवोच्चारणं भवति, यथा प्राचीनकाले तेषामुच्चारणमभूत् । शास्त्रमिदं यद्यपि वैदिकव्याकरणलक्षणप्रयोगज्ञानाय निर्मितमिति प्रतिभाति, तथापि अद्यतनीयाः भाषावैज्ञानिकाः अपि उच्चारणविद्यान्तर्गते अस्य विषयस्याध्ययनं कुर्वन्ति ।

**संदर्भ**

1. तैत्तिरीयोपनिषद् शिक्षावल्ली, अनुवाकम् 2
2. व्याकरणमहाभाष्यम् पस्पशाह्निकम्
3. पा शि 3
4. पा शि 4
5. तैत्तिरीयप्रातिशाख्यम् 1/6 सूत्रस्थ वैदिकाभरणभाष्यम्
6. तैत्तिरीयप्रातिशाख्यम् 1/5 सूत्रस्थ वैदिकाभरणभाष्यम्
7. तैत्तिरीयप्रातिशाख्यम् 1/3 सूत्रस्थ उवटभाष्यम्
8. पा शि 5
9. पा शि 38
10. पा शि 6
11. ऋग्वेदः 1/164/45
12. पा शि33
13. पा शि 34
14. पा शि 25

**Refrences**


1. अवस्थी बच्चूललो ज्ञानोपाह्वः (वि.सं २०५०) पणिनीयशिक्षा आचार्यकुलप्रकाशनम् |
2. Ghosh, Manmohan. Pāṇinīya-Śikṣā, University of Calcutta; c1938.
3. Freund. F. Peter. Paniniya Shiksha: In the Rig Veda Recension Createspace Independent Pub, USA; c2017.